ISSN 2278 - 0688
Volume - XV

# ऋतायनी

A REFEREED RESEARCH JOURNAL OF SANSKRIT

Purulia , West Bengal

CamScanner

ISSN 2278 - 0688
Volume- XV
April 2019

# ऋतायनी

## A REFEREED RESEARCH JOURNAL OF SANSKRIT

**Chief Editor**
**Dr. Chandrakanta Panda**

**Editor**
**Dr. Jagamohan Acharya**

**Associate Editors**
Dr. Buddheswar Sarangi
Dr. Jogeswar Mahanta
Sushant Pradhan

Purulia, West Bengal

CamScanner

Volume- XV April-2019 ISSN 2278 - 0688

# CONTENTS


| No. | Title | Author | Page |
|---|---|---|---|
| 1. | भारतवर्षीमित्यस्य संस्कृतानूदितकाव्यस्य लोकोपयोगित्वम् | डा.भारतभूषणरथ: | 1 |
| 2. | सिद्धान्तकौमुद्यां प्रतिफलिता प्राचीनशिक्षाव्यवस्था | गीताञ्जलित्रिपाठा | 7 |
| 3. | Some Ideal woman in ancient India | Dr. Samapti Garai | 14 |
| 4. | Kingship in ancient India | Sanchita Kundu | 24 |
| 5. | आचार्य रघुनन्दनविरचित शुद्धितत्त्वग्रन्थौ प्रतिपादित द्रव्यशुद्धिप्रकार: | बावलुप्रामानिक: | 35 |
| 6. | Purusartha : Its Present day Relevance | Dr. Bibhuti Bhusan Nayak | 47 |
| 7. | Position of Sanskritic learning from past to present in India | Dr. Bidisha Misra | 55 |
| 8. | Forms of marriage in Manusmruti and Court of Law | Dr Anusuya Prusty | 60 |
| 9. | Importance of principal Upanisads | Namita Kumari Naik | 70 |
| 10. | Natural Disaster and its Management in Kautilya's Arthasastra | Soma Bandyopadhyay | 78 |
| 11. | The definitions and characteristics of muktaka as mentioned by the different Sanskrit rhetoricians | Dr. Pratim Bhattacharya | 85 |
| 12. | श्रीमदभागवतं नाम पूराणं विश्वविश्रुतम् | श्रीमती सुकन्या सेनापति | 90 |
| 13. | न्यायनये मुक्तिकारणविचार: | डां. मनोरञ्जन-दास: | 94 |
| 14. | शिशुपालवध-महाकाव्ये माघस्य संगीतचेतना | ड. शीला चक्रवता | 97 |
| 15. | वैदिकशब्दानां रहस्यात्मकं निर्वचनम् | ड़.जगमोहन आचार्य: | 101 |
| 16. | Agriculture and Management in Arthasastra | Kabita Ray | 109 |
| 17. | Concept of Environment and Environmental Awareness in Ancient Indian Literature – A Succinct Review | Dr. Partha Pratim Roy | 113 |
| 18. | विधौ संज्ञासूत्राणां प्रवृत्तिप्रकार: | शम्भु मान्ना | 118 |
| 19. | Creation: A Study on Christianity and Hinduism | Mrs. Mrinmoyee Samanta | 124 |
| 20. | Music in Gitagovinda | Dr. Santanu Mandal | 131 |
| 21 | वामनपुराणे मोक्षस्य अवधारणा | तरणीकुमारपण्डा | 135 |
| 22. | अष्टाङ्गयोगदिशा यमस्याधारेण मानवीयमूल्यबोध: | दीपाञ्जलिभञ्ज: | 143 |

# न्यायनये मुक्तिकारणविचार:

डॉ. मनोरञ्जन-दास:

इह दु:खत्रयनिमज्जितमायामोहविजडितज्वालाकुलेऽस्मिन् संसारे 'सुखं मे स्यात् दु:खं मा भूदि'ति व्यासभाष्यस्य वचनानुसारं सर्वे सलु सुखमन्विष्यमर्थमनुधावन्त: नाना विधासु पापकर्मसु निर्लिप्ता: भवन्ति। परन्तु ते विपथगामिन: नैव विदन्ति यत् कोऽहम्? कुतो आगतो वा? किं मम करणीयम्? जगत्यस्मिन् मम का आवश्यकता? मरणानन्तरं कुत्र वा मम स्थिति:?। एवं रीत्या प्रश्ना: यदा जीवस्य मनसि समागच्छन्ति तदा जीव: दु:खपङ्कनिम्मज्जित अस्मात् संसारसागरात् समुद्धर्तुं भगवन्तं सविनयेन प्रार्थयति – हे भगवन् मां मुक्ति देहि इति।

तत्र का नाम मुक्ति:? केन प्रकारेण तस्या: प्राप्रिर्भवेत्? मुक्तिशब्द: - मुचुल्मोक्षणे – इत्यस्माद् धातो: घञ् प्रत्यय: भूत्वा मोक्ष: इति शब्दो निष्पन्न:। कस्मान्मोक्षणमिति वीक्षायां दु:खादिति सम्बध्यते। भारतीयदार्शनिकानां मते धर्म-अर्थ-काम-मोक्षभेदेन पुरुषार्थचतुष्टयं विद्यते। तेषु समेषां चरमाभिलषितं लक्ष्यं खलु भवत्येषोऽन्तिमपुरुषार्थ: मोक्ष: एव।

दृष्टादृष्टभेदेन च पुरुषार्थस्य पन्था द्विविध:। तत्रादृष्टे स्वर्गापवर्गमात्रे मोहविलुप्तालोकजनानां शास्त्रमेव प्रकाशस्वरुपम्। अत: अस्माभिरेव शास्त्रमधिगन्तव्यम्।

पुरुषार्थचतुष्टये मोक्षापवर्गो वान्तिम् इत्यत्र नैव विप्रतिपत्ति:। किन्तु मोक्षस्वरुपविषये दार्शनिकानां मतभेद: एव दृश्यते। वस्तुत: सर्ववादिसिद्धार्थो भवति – आत्यन्तिकदु:खनिवृत्तिरुपमोक्ष: इति।

अत: मुक्तिकारणविचारप्रसङ्गे पदार्थमोक्ष: निर्णय: इत्यभिप्राय:। अयं विषय: गौतमीये नये काणदीये च तुल्य। पदार्थधर्मं संगृह्णन् कणाद:" धर्मविशेषप्रसूतात् द्रव्य-गुण-कर्म-सामान्य-विशेष-समवायानां पदार्थानां साधर्म्यवैधर्म्याभ्यां तत्त्वज्ञानात् लि:श्रेयसम्' इति सूत्रे पदार्थानां तत्त्वज्ञानस्य मोक्षोपायत्वं बोधितम्। तथैव गौतमोऽपि "प्रमाण-प्रमेय-संशय-प्रयोजन-दृष्टान्त-सिद्धान्त-अवयव-तर्क-निर्णय-वाद-जल्प-वितण्डा-हेत्वाभास-छल-जाति-निग्रहस्थानानां तत्त्वज्ञानात् नि:श्रेयसाधिगम:' इति आद्ये सूत्रे तत्तवज्ञानान्मोक्ष इति जगाद।

तत्त्वज्ञानं नाम यथार्थायज्ञार्थज्ञानयो: यत् ज्ञानं भवति तदेव तत्त्वज्ञानमिति। यथार्थज्ञानं नाम तद्वति तत्प्रकारकं ज्ञानम्। यथा रजततत्त्ववति रजते रजततत्त्वप्रकारकं ज्ञानम्। अयथार्थज्ञानं रजततत्त्वप्रकारकं ज्ञानम्। अयतार्थज्ञानं भवति अतद्वति अतद्प्रकारकं ज्ञानम्। यथा रजततत्त्वाभाववत्या सुत्किकायां रजत्त्वप्रकारकं ज्ञानम्। यद्यापि द्वयो: ज्ञानं वर्त्तते वा न वा तत्र तत्त्वज्ञानं तु मोक्ष: इति गौतमीयं वाक्यं यथार्थम्।

परन्तु यदा अन्यदार्शनिकाः अस्माभिः परिदृश्यन्ते तेषां मते मतभेदाः वर्तन्ते। तेषां मध्ये नास्तिशिरोमणिचार्वाकिन उक्तं तत्र स्वातन्त्र्यं मृत्युर्वा मोक्ष इति। अर्थात् आवरणमुक्ति इति मुक्तिमाह। आत्मच्छेदो मोक्ष इति माध्यमिकाः। धर्मनिवृत्तौ निर्मलज्ञानोदय इति विज्ञानवादिनः। पूर्णात्मलाभता इति प्रत्यभिज्ञावादिनः। पराख्यप्रथमवार्णादर्शनं मोक्ष इति वैयाकरणाः। नित्यसुखाभिव्यक्तिः मुक्तिरिति तौतातिताः पुरुषस्य कैवल्येनावस्थानं कैवल्यम् इति पातञ्जलाः। प्रकृत्युपरमे पुरुषस्य स्वरुपेणावस्थानं मुक्तिरिति साख्याः। विष्णुभक्तिधर्माचरणात् विष्णुलोकगमनं वा मोक्ष इति वैष्णवाः। आनन्दमये परमात्मनि जीवात्मलयः मोक्षः भास्करीयाः, प्रलीननिखिलोपाधेः क्षेत्रज्ञस्य सततोर्ध्वगतिः मोक्ष इति जैना। स्वर्गलोकप्राप्तिः मोक्ष इति मीमांसका। स्वसमानाधिकरण दुःखप्राग्भावासमानकालीनदुःसध्वंसः मोक्ष इति तार्तिकाः। सर्वकर्तृत्त्वमेकं विहाय वासुदेवस्य सर्वज्ञत्वादीनां कल्याणगुणानाम् आप्तिमत्वे सति भगवद् याथात्म्यानुभवः मोक्षः रामानुजीयाः जगत्कर्तृत्वम्, लक्ष्मीपतित्वम्, श्रीवत्सर्वज्ञभगवज्जानायत्तनिर्दुः खपूर्णं सुखं मोक्ष इति माध्वाः। परमैश्वर्यप्राप्तिः मोक्ष इति माहेश्वराः। चन्द्रचूडवपुषः पार्वत्यालिङ्गनं मोक्ष इति कापालिकाः। पूर्णात्मलाभः मोक्ष इति अभिनवगुप्ताचार्याः नित्यसुखसाक्षात्कारः मोक्षः इति भाट्टा। आत्यन्तिकदुः खप्राग्भावपरिपालनं मोक्ष इति प्राभाकराः। परा-पश्यन्ती-मध्यमा-वैखरी इति वाणीचतुष्टये प्रथमाया पराख्याया ब्रह्मख्याया वाण्याः दर्शनं मोक्ष इति अद्वैतवेदान्तिनः।

परन्तु नैयायिकानां मते मोक्षो नाम आत्यन्तिकदुःखनिवृत्ति। अर्थात् सम्पूर्णदुःखानाम् अत्यन्तनिवृत्तिः। निवृत्ति नाम ध्वसः। आत्यन्तिकत्वं नाम दुःखासमानकालीनत्वम्। अर्थात् या दुःखनिवृत्ति केनापि दुःखेन सह न तुलनीया भवति। तथा च संसारदशायां दुःखनिवृत्तौ नैव अतिव्याप्तिः। एतत्त न्यायवैशेषिकानाञ्च मतम।

नैयैयिकानां मते तत्त्वज्ञानेन अदृष्टनिवृत्तें: पश्चात् जीवस्यापवर्गस्य प्राप्तिः भवति। दुःखस्य आत्यनन्तकनिवृत्तिरेव मोक्षः भवति। तदत्यन्तविमोक्षोऽपवर्गः अत्र आत्यन्तिक शब्दस्य तात्पर्यं भवति पुनर्जन्माभावः। तत्त्वज्ञानमेव मोक्षस्य सुखसाधनं भवति। एतदतिरिक्तः अष्टाङ्गयोगः एव तत्त्वज्ञानस्य साधनं भवति येन आत्मनः साक्षात्कारः भवति। एतद् एव मोक्षस्य प्रमुखहेतुः भवति। अनेन साक्षात्कारेण जीवः बन्धनमुक्तो भवति।

त्रिविधकर्ममध्ये प्रारब्धकर्मणः भोगेन एव क्षयः भवति। क्रियमाणकर्मणः सञ्चितकर्मणश्च तत्त्वज्ञानेन क्षयः भवति। एतदर्थं श्रीमद्भगवद्गीतायां श्रीकृष्णेन प्रोक्तं यत् ज्ञानाग्निः सर्वकर्माणि भस्मसात् कुरुतेऽर्जुनः(गीता,४/ ३७)इति मोक्षप्राप्तये विविधानि कारणानि दृश्यन्ते शास्त्रेषु। अतः मोक्षस्य कः अधिकारीत्यस्मिन् प्रसङ्गे जरन्नैयायिकेन जयन्तभट्टेन न्यायमञ्जरीग्रन्थे प्रोक्तं यत्– संसारे अस्मिन् चतुर्विधाः पुरुषाः निवसन्ति अज्ञ-सन्दिग्ध विपर्यस्य-निश्चितमिति भेदेन। अज्ञो नाम अप्रतिपन्नः, सन्दिग्धः नाम सन्देहापन्नः, विपर्यस्यः नाम विपरीतापन्नः, निश्चितमतिः

शास्त्रं निर्मीति अज्ञस्य अज्ञता दुरीकर्तुम् सन्दिग्धस्य सन्दहं निराकर्तुं, विपर्यस्तस्य विपर्यासबुद्धिं विनाशकर्तुम्। अत: निश्चितमतिस्तु साक्षात् मोक्षं उपलभते परन्तु अन्ये ये सन्ति ये तु अक्षमा:। भगवता श्रीकृष्णेनापि श्रीमद्भागवद्गीतायां प्रतिपादितं यत्—

चतुर्विधा: भजन्ते मां जना: सुकृतिनोऽर्जुन:।
आर्तीजिज्ञासुरर्थार्थी ज्ञानी च भरतर्षभ:।। (गिता,७/१६)

एतदर्थं दृष्टादृष्टभेदेन च पुरुषार्थस्य पन्था द्विविध: भवति। तत्र अदृष्टे स्वर्गापवर्गमात्रे मोहविलुप्ता लोकजनानां प्रकाशस्वरुपम्। वेदा: प्रमाणम् न्यायेन अतोऽस्माभिरेव शास्त्रमधिगन्तव्यमिति शम्।

संस्कृतविभागाध्यक्ष:
मुगवेडिया-गङ्गाधर-महाविद्यालय:
भूपतिनगरम्,
पूर्वमेदिनीपुरम्, पश्चिमवङ्ग: